संस्कृतवार्ताः

23.10.2024

सायं - 06:20

<u>मुख्यवार्ताः</u>

- प्रधानमन्त्री नरेन्द्रमोदी अद्य रूसदेशस्य कजान-नगरे ब्रिक्स इति शिखर सम्मेलनावधौ चीनदेशीयेन राष्ट्रपतिना शी-जिनपिंग इत्यमुना साकं द्विपक्षीय -सम्वादं कुर्वन्नस्ति।
- सर्वोच्चन्यायालयेन अद्य उक्तं यत् वायुगुणवत्ताप्रबन्धनायोगस्य (CAQM) इत्यस्य अधिनियमान्तर्गतं धान्यापशिष्टदहनदण्डस्य प्रावधानं कार्यान्वितं न भवति।
- केरले कांग्रेस-प्रत्याशिना प्रियंका-गान्धिना अद्य मध्याह्ने वायनाड-संसदीयक्षेत्रात् स्वीयनामाङ्कनं निवेदितम्।
- दाना-चक्रवातस्य आगमनात्पूर्वं ओडिशा-प्रशासनेन संचेतना-प्रसारिता शिक्षण-संस्थानानि च दिनत्रयं यावत् पिहितानि।
- क्रिकेटप्रतिस्पर्धायां, भारतन्यूजीलैण्डदलयोर्मध्ये द्वितीया क्रिकेट निकषस्पर्धा श्वः पुणेनगरस्य महाराष्ट्र-क्रिकेट-सङ्घ-क्रीडाङ्गणे प्रातः सार्धनववादनतो भविष्यति।

<u>प्रधानमन्त्री – सम्बोधनम्</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य रूसदेशस्यकजान-नगरे ब्रिक्सइति शिखर सम्मेलनवधौ चीनदेशीयेन राष्ट्रपतिना शी-जिनपिंग इत्यमुना साकं द्विपक्षीय -सम्वादं कुर्वनस्ति। उपवेशनमिदं वास्तविक-नियन्त्रण-रेखायाः प्रहरित्वप्रबन्धनम् आधृत्य चीनभारतदेशयोर्मध्ये सजातनिर्णायस्य अनन्तरं महत्वपूर्णमस्तीति। प्रधानमन्त्रिणः श्रीमोदिनः चीनदेशस्य राष्ट्रपतेः मध्ये एतत् उपवेशनं विगतेषु पञ्चवर्षेषु प्रथमं सुनियोजितम् उपवेशनम् अस्ति। ह्यः श्रीपुतिनेन साकं जाते उपवेशने श्रीमोदी सबलं प्रतिपादितवान् यत् भारतं रूस-यक्रेन-देशयोः सङ्घर्षस्य शान्तिपूर्णसमाधानाय साहाय्यं दास्यति। विदेशसचिवः विक्रममिस्त्री इत्येषः वार्ताहरान् सम्बोधितवान् यत् श्रीमोदी राष्ट्रपतिना श्रीपुतिन इत्यनेन साकं जातस्य सम्वादस्य विषये सूचना प्रदत्ता।

प्रधानमन्त्री नरेन्द्रमोदी अद्य ब्रिक्सराष्ट्रेभ्यः आतङ्कवादं आतङ्कवित्तपोषणं च निवारणाय सम्भूय सहकार्यं कर्तुं आहूतवान्। सः अवदत् यत् एतादृशे गभीरविषये द्विगुणमनोभावस्य स्थानं नास्ति। कजाननगरे षोडशतमे ब्रिक्स-शिखरसम्मेलनस्य समापनसत्रे श्रीमोदी यूनां मध्ये कट्टरतावादतां निवारयितुं सक्रियपदक्षेपानाम् आवश्यकतायाः उपरि बलं दत्तवान्। सः

संयुक्तराष्ट्रसङ्घस्य अन्ताराष्ट्रिय-आतङ्कवाद-सम्बद्धस्य व्यापक-सम्मेलनस्य लम्बित-विषये एकत्र कार्यं कर्तुं आवाहनं कृतवान्।

सर्वोच्चन्यायालय-वायुप्रदूषणम् :

सर्वोच्चन्यायालयेन अद्य उक्तं यत् वायुगुणवत्ताप्रबन्धनायोगस्य (CAQM) इत्यस्य अधिनियमान्तर्गतं धान्यापशिष्टदहनदण्डस्य प्रावधानं कार्यान्वितं न भवति।

सर्वोच्चन्यायालयेन उक्तं यत् वायुगुणवत्ताप्रबन्धनआयोगस्य (CAQM) इत्यस्य अधिनियमः वायुप्रदूषणं निवारणाय विधेः कार्यान्वयनाय आवश्यकयन्त्राणां निर्माणं विनैव निर्मितः। केन्द्रस्य प्रतिनिधित्वेन ऐश्वर्या भाटी न्यायालयाय आश्वासनं दत्तवती यत् दशसु दिवसेषु अधिनियमाः अन्तिमरूपेण निर्धारिताः पूर्णतया कार्यान्विता च भविष्यन्ति। पञ्जाब-हरियाणा- राज्ययोः सर्वकारेण दोषिणः विरुद्धं धान्यअपशिष्टदहनस्य विषये किमपि कार्याचरणं न सम्पादितम् अस्मिन् विषये अपि सर्वोच्चन्यायालयेन उक्तम्।

केरल-उपनिर्वाचनम्

केरले कांग्रेस-प्रत्याशिना प्रियंका-गान्धिना अद्य मध्याह्ने वायनाड-संसदीयक्षेत्रात् स्वीयनामाङ्कनं निवेदितम्। अस्मिन् निर्वाचन क्षेत्रे उपनिर्वाचनं अग्रिममासस्य त्रयोदशदिनाङ्के चेलाक्कारा-पलक्कड़-विधानसभाक्षेत्रै: सह भविष्यति। निर्वाचनद्वन्द्वे प्रियंकागान्धिन: अयं प्रथम: पदक्षेप: भविष्यति। कलपेट्टानगरे तस्या: आगमने भव्यं स्वागतम् अभवत्। तत्र सहस्त्रशै: दलकार्यकर्तृभि: करताडनेन, ध्वजोत्तोलनेन सहैव जयघोषेण सह तस्या: स्वागतं कृतम्। सा विपक्षनेत्रा राहुलगान्धिना, एआईसीसी, महासचिवेन सी वेणुगोपालेन सह, तथैव कांग्रेसस्य एवं यूडीएफगठबन्धनस्य सहयोगिभि: सह पथपदर्शने-भागं गृहीतवती। प्रियंका-गान्धिना सह कांग्रेसस्य अध्यक्ष: मल्लिकार्जुन खड्गे, लोकसभायां विपक्षनेता राहुलगान्धि:, कांग्रेससंसदीय-दलस्य नेतृ सोनिया गान्धी इत्येषपि आसीत्।

## महाराष्ट्र-विधानसभानिर्वाचनम्

शिवसेना दलेन राष्ट्रवादी कांग्रेसदलेन च आगामिने महाराष्ट्र-विधानसभा-निर्वाचनार्थं स्वप्रत्याशिनां नामोद्घोषणं विहितम्। राष्ट्रवादी-कांग्रेसदलेन अद्य महाराष्ट्रविधानसभा-निर्वाचनार्थं अष्टत्रिंशत्-प्रत्याशिनां स्वीय-प्रथमा सूचि: निस्सारिता। तत्र उपमुख्यमन्त्री अजीत-पवार: बारामती-निर्वाचनक्षेत्रात् वर्तते। यस्य स: वर्तमाने प्रतिनिधित्वं कुर्वन्नस्ति। अपरत्र छगन-भुजबल इत्येष: येओलात:, दिलीप-वलसे-पाटिल:, अम्बेगांवक्षेत्रात्, हसन-मुश्रीफ: कागलत:, धनञ्जय-मुण्डे च परलीत: निर्वाचनद्वन्द्वे भागं भजिष्यति। विधानसभाया: उपाध्यक्ष: नरहरि झिरवाल:, धर्मराव आत्राम:, अदिति तटकरे इत्येते क्रमश: डिंडोरी-अहेरी-श्रीवर्धनक्षेत्रै: निर्वाचनद्वन्द्वे आगन्तुं सन्नद्धा: सन्ति। शिवसेनया स्वीय-पञ्चचत्त्वारिंशत् प्रत्याशिनां समुद्घोषणा कृता। तत्र मुख्यमन्त्री एकनाथ-शिंदे इत्येष: कोचरी-पचपाखड़ी क्षेत्रात् पुन: निर्वाचने भागं भजिष्यति। अस्य क्षेत्रस्य स: वर्तमानेऽपि प्रतिनिधित्वं कुर्वन्नस्ति। एतदतिरिरच्य राज्यमन्त्री अब्दुल-सत्तार: सिल्तोऽक्षेत्रात्, सञ्जय राठौड़: दिग्रसक्षेत्रात्, संतोष-बांगर: कलमनुरीत:, सहैव सञ्जय-शिरसाट: छत्रपति-संभाजीनगर-पश्चिममत: निर्वाचने भागं ग्रहीष्यति। अत्रान्तरे महाराष्ट्र-नवनिर्माणसेनया अपि पञ्चचत्त्वारिंशत्-प्रत्याशिनां स्वीया द्वितीय सूचि: निस्सारिता। मनसे-प्रमुखस्य राज-ठाकरे इत्यस्य पुत्र: अमित-ठाकरे माहिमक्षेत्रात् निर्वाचनार्थं सन्नद्धो वर्तते।

## दाना चक्रवात:

एनडीआरएफ इत्यनेन दाना चक्रवातस्य आगमनात् पूर्वं ओडिशायां विंशतिदलानि तथैव पश्चिमबंगाले त्रयोदशदलानि नियोजितानि सन्ति। दाना-चक्रवातस्य आगमनात्पूर्वं ओडिशा-प्रशासनेन संचेतना-प्रसारिता शिक्षण-संस्थानानि च दिनत्रयं यावत् पिहितानि।

नवदिल्ल्यां वार्ताहरै: सह संवादकाले एनडीआरएफ-इत्यस्य उपमहानिरीक्षकेन मोहसेन-शाहिदी इत्यमुना कथितं यत् पश्चिमबंगाले चत्वारि दलानि भिन्नतया स्थापितानि सन्ति। तेन प्रोक्तं यत् आन्ध्रप्रदेशस्य विजागस्थानेऽपि सन्नद्धता वर्तते। उपमहानिरीक्षकेन कथितं यत् छत्तीसगढ़ेन सह झारखण्डेऽपि दलानि सन्ति।

## ऋतोः पूर्वानुमानं - ग्रामपंचायते

देशे ऋतोः पूर्वानुमानं सम्प्रति ग्राम-पंचायत-स्तरेषु अपि उपलब्धो भविष्यति। ग्रामपञ्चायतानां कृते ऋतोः पूर्वानुमानं प्रदातुं प्रतिहोरासु ऋतोः पूर्वसूचनायाः निरीक्षणस्य सौविध्येन सह श्वः आरभ्य एकं महत्त्वपूर्णं परिवर्तनकारी च उपक्रमं सर्वकारेण प्रारभ्यते। पंचायती-राजमंत्री राजीवरंजनसिंह: नवदिल्ल्यां अस्य उपक्रमस्य शुभारंभं करिष्यति।

पंजाब- क्षेत्राग्निः

सर्वोच्चन्यायालयस्य वायुगुणवत्ताप्रबन्धनआयोगस्य च निर्देशानां अनुपालनेन धान्यअपशिष्टदहन प्रकरणेषु न्यूनताऽनेतुं पंजाब-आरक्षिणः कृषकान् धान्यअपशिष्टदहनस्य हानिकारकप्रभावविषये शिक्षितुं तथा च दोषिणः विरुद्धं विध्याधारितं कार्याचरणम् कर्तुं बृहद् अभियानं समारब्धम् अस्ति। आरक्षी, विधि व्यवस्थायाः महानिदेशकाय अर्पित शुक्ल वर्याय निरीक्षणाय समुचित कार्याचरणाय च नियुक्त: अस्ति।

भारतक्रिकेट

क्रिकेटप्रतिस्पर्धायां, भारतन्यूजीलैण्डदलयोर्मध्ये द्वितीया क्रिकेट निकषस्पर्धा श्व: पुणेनगरस्य महाराष्ट्र-क्रिकेट-सङ्घ-क्रीडाङ्गणे प्रात: सार्धनववादनतो भविष्यति।

प्रधानमन्त्री-मन की बात

प्रधानमन्त्री नरेन्द्र मोदी इत्येषः अक्टूबरमासस्य सप्तविंशे दिनाङ्के आकाशवाण्याः 'मन की बात' इत्यस्मिन् कार्यक्रमे देश-विदेशस्थजनैः सह स्वविचारान् विनिमयीकरिष्यति। इदं मासिक- रेडियो - कार्यक्रमस्य पञ्चदशाधिक - शततमं संस्करणं भविष्यति।

।।इति वार्ता:।।